# सन्देशः



समुपजोषमद्य प्रत्यग्र–संस्कृत–विश्वविद्यालयः नाद्याप्यभूत् कार्णाटकिकप्रान्ते । पुण्यपत्तनादौ नूनम् आसन्नपञ्चविंशवत्सरेभ्यः प्राक् प्रतिष्ठापितोऽस्माभिरश्रावि । अत्राप्यावश्यकं प्रतिष्ठाप्यते विद्यागृहमिति भूषणतरमेवास्य प्रान्तस्य । वैदेशिका अपि नूनं गैर्वाणवाणीं समादरेण मन्वते । यतोऽत्र वाण्यामेकं पदमेकं वाक्यं च प्रयुज्यमानं सभङ्गमभङ्गं च विविधानर्थानस्यां बोधयन्ति । तथा कामपरां भाषामेवंविधां सम्मानयन्ति कोविदमतल्लिकाः वैदेशिका अपि । अत एवायं वि$\mu$विद्यालयः चतुर्दशविद्याध्यायिनाम् अध्यापकानां च स्वस्तिकृद्भूयादिति भगवन्तं भारतीरमणं भवानीजानिं च समनुनाथामहे इति शिवम् ।

राष्ट्रपतिप्रशस्तिपुरस्कृताः
पं. उप्पिनबेटगेरीत्युपाह्वाः
भालचन्द्रशास्त्रिणः
धारवाड – ५८० ००१